लग्नादतीव वसुमान् वसुमांश्च शशाङ्कात्सौम्यग्रहैरुपचयोपगतैः समस्तैः। द्वाभ्यां समोऽल्पवसुमांश्च तदूनतायामन्येष्वसत्स्वपि फलेष्विदमुत्कटेन”।

द्विग्रहादियोगास्तु १२ अ० उक्ता यथा

“तिग्मांशुर्जनयत्युषेशसहितो यन्त्राश्मकारं नरं भौमेनाघरतं बुधेन निपुणं धीकीर्त्तिसौख्यान्वितम्। क्रूरं वाक्पतिनान्यकार्यनिरतं शुक्रेण रङ्गायुधैर्लब्धस्वम् रविजेन धातुकुशलं भाण्डप्रकारेषु वा। कूटस्त्र्यासवकुम्भपण्यमशिवं मातुः सवक्रः शशी सज्ञः प्रश्रितवाक्यमर्थनिपुणं सौभाग्यकीर्त्यान्वितम्। विक्रान्तं कुलमुख्यमस्थिरमतिं वित्तेश्वरं साङ्गिरा वस्त्राणां ससितः क्रयादिकुशलं सार्किः पुनर्भूसुतम्। मूलादिस्नेहकूटैर्व्यवहरति वणिग्बाहुयोद्धा ससौम्ये पुर्य्यध्यक्षः सजीवे भवति नरपतिः प्राप्तवित्तो द्विजो वा। गोपो मल्लोऽथ दक्षः परयुवतिरतो द्यूतकृत् सासुरेज्ये दुःखार्त्तोऽसत्यसन्धः ससवितृतनये भूमिजे निन्दितश्च। सौम्ये रङ्गचरो बृहस्पतियुते गीतप्रियो नृत्यविद्वाग्मी भूगणपः सितेन मृदुना मायापटुर्लङ्घकः। सद्विद्यो धनदारवान् बहुगुणः शुक्रेण युक्ते गुरौ। ज्ञेयः श्मश्रुकरोऽसितेन घटकृज्जातोऽन्नकारोऽपि वा। असितसितसमागमेऽल्पचक्षुर्युवतिसमाश्रयसंप्रवृद्धवित्तः। भवति च लिपिपुस्तचित्रवेत्ता कथितफलैः परतो विकल्पनीयाः”।

अथ नक्षत्रभेदे जन्मफलम् बृहज्जातके १६ अ०।

“प्रियभूषणः सुरूपः सुभगो दक्षोऽश्विनीषु मतिमांश्च। कृतनिश्चयः सत्यवाग् दक्षः सुखितश्च भरणीषु। बहुभुक्परदाररतस्तेजस्वी कृत्तिकासु विख्यातः। रोहिण्यां सत्यशुचिः प्रियंवदः स्थिरमतिः सुरूपश्च। चपलश्चतुरो भीरुः पटुरुत्साही धनी मृगे भोगी। शठगर्वितः कृतघ्नो हिंस्रः पापश्च रौद्रर्क्षे ६। दान्तः सुखी सुशीलो दुर्मेधा रोगभाक् पिपासुश्च। अल्पेन च सन्तुष्टः पुनर्वसौ जायते मनुजः। शान्तात्मा सुभगः पण्डितो धनी धर्मसंश्रितः पुष्ये। शठसर्वभक्षः पापः कृतघ्नधूर्त्तश्च भौजङ्गे ९। बहुभृत्यधनो भोगी पितृभक्तो महोद्यमः पित्र्ये १०। प्रियवाग् दाता द्युतिमानटनो नृपसेवको भाग्ये ११। सुभगो विद्याप्तधनो भोगी सुखभाग् द्वितीयफाल्गुन्याम्। उत्साही धृष्टः पानपोऽघृणी तस्करो हस्ते। चित्राम्बरमाल्यधरः सुलोचनाङ्गश्च भवति चित्रायाम्। दान्तो वणिक् कृपालुः प्रियवाग् धर्माश्रितः स्वातौ। ईर्ष्युर्लुब्धो द्युतिमान् वचनपटुः कलहकृद्विशाखासु। आढ्यो विदेशवासी क्षुधालुरटनोऽनुराधासु। ज्येष्ठासु न बहुमित्रः सन्तुष्टो धर्मकृत् प्रचुरकोपः। मूले मानी धनवान् सुखी नहिंस्रः स्थिरो भोगी। इष्टानन्दकलत्रो मानी दृढः सौहृदश्च जलदेवे २०। वैश्वे २१ विनीतधार्मिकबहुमित्रः कृतज्ञसुभगश्च। श्रीमान् श्रवणे श्रुतवानुदारो धनान्वितः ख्यातः। दाताऽऽढ्यः शूरः गीतप्रियो धनिष्ठासु धनलुब्धः। स्फुटवाग् व्यसनी रिपुहा साहसिकः शतभिषजि दुर्ग्राह्यः। भाद्रपदासूद्विग्नः स्त्रीजितधनी पटुरदाता च। वक्ता सुखी प्रजावान् जितशत्रुर्धार्मिको द्वितीयासु। सम्पूर्णाङ्गः सुभगः शूरः शुचरथवान् पौष्णे”२७।

जन्मराशिफलम् तत्रैव १७ अ०।

“वृत्तात्म्राक्षउष्णशाकलघुभुक् क्षिप्रप्रसादोऽटनः कामी दुर्बलजानुरस्थिरधनः शूरोऽङ्गनावल्लभः। सेवाज्ञः कुनखी व्रणाङ्कितशिरोमानी सहोत्थाग्रजः शक्त्या पाणितलेऽङ्कितोऽतिचपलस्तोये च भीरुः क्रिये १। कान्तः खेलगतिः पृथूरुवदनः पृष्ठास्यपार्श्वेऽङ्कितस्त्यागी क्लेशसहः प्रभुः ककुदवान् कन्याप्रजः श्लेष्मजः। पूर्वैर्बन्धुधनात्मजैर्विरहितः सौभाग्ययुक्तः क्षमी दीप्ताग्निः प्रमदाप्रियः स्थिरसुहृन्मध्यान्त्यसौख्ये गवि २। स्त्रीलोलः सुरतोपचारकुशलस्ताम्रेक्षणः शास्त्रविद्दूतः कुञ्चितमूर्द्धजः पटुमतिर्हास्येङ्गितद्यूतवित्। चार्वङ्गः प्रियवाक् प्रभक्षणरुचिर्गीतिप्रियो नृत्यवित् क्लीवैर्याति रतिं समुन्नतनसश्चन्द्रे तृतीयर्क्षगे ३। आवक्रद्रुतगः समुन्नतकटिः स्त्रीनिर्जितः सत्सुहृद्दैवज्ञः प्रचुरालयः क्षयधनैः संयुज्यते चन्द्रवत्। ह्रस्वः पीनगलः समेति च वशं साम्ना सुहृद्वत्सलस्तोयोद्यानरतः स्ववेश्म४सहिते जातः शशाङ्के नरः। तीक्ष्णः स्थूलहनुर्विशालवदनः पिङ्गेक्षणोऽल्पात्मजः स्त्रीद्वेषी प्रियमांसकाननगः कुप्यत्यकार्ये चिरम्। क्षुत्तृष्णोदरदन्तमानसरुजासंपीडितस्त्यागवान् विक्रान्तः स्थिरधीः सुगर्वितमना मातुर्विधेयोऽर्कभे ५। व्रीडामन्थरचारुवीक्षणगतिः स्रस्तांसबाहुः सुखी श्लक्ष्णः सत्यरतः कलासु निपुणः शास्त्रार्थविद्धार्मिकः। मेधावी सुरतप्रियः परगृहैर्वित्तैश्च संयुज्यते कन्यायां ६ परदेशगः प्रियवचाः कन्याप्रजोऽल्पात्मजः। देवब्राह्मणसाधुपूजनरतः प्राज्ञः शुचिः स्त्रीजितः प्रांशुश्चोन्नतनासिकः कृशचलद्गात्रोऽटनोऽर्थान्वितः। हीनाङ्गः क्रयविक्रयेषु कुशलो देवद्वि-